# 18. अष्टादशः पाठः
## राणाप्रतापः

भविष्य-कालः

मेवाडराज्यं बहूनां शूराणां जन्मभूमिः । तस्य राजा उदयसिंहः आसीत् । उदयसिंहस्य शासनकाले मेवाडचित्तौडादीनि स्थानानि शत्रुवशं गतानि । उदयसिंहस्य मरणस्य अनन्तरं तत्पुत्रः राणाप्रतापः सिंहासनम् आरूढवान् ।

'हस्तच्युतानां भागानां प्रतिप्राप्तिः कथम्' इति विचिन्त्य सः पुरप्रमुखाणां सभाम् आयोजितवान् । तत्र सः प्रतिज्ञां कृतवान् - "चित्तौडस्थानं यावत् न प्रतिप्राप्स्यामि तावत् सुवर्णपात्रे भोजनं न करिष्यामि । राजप्रासादे वासं न करिष्यामि । मृदुतल्पे शयनम् अपि न करिष्यामि" इति । तदा पुरप्रमुखाः अवदन् - "राजन् ! भवान् एवं सुखं त्यक्ष्यति चेत् वयं कथं वा सुखम् अनुभविष्यामः ? अतः वयम् अपि सुखसाधनानि त्यक्ष्यामः । देशाय यथाशक्ति धनं दास्यामः । अस्मत्पुत्रान् सैन्यं प्रति प्रेषयिष्यामः" इति ।

एतदनन्तरं ग्रामप्रमुखाः अवदन् - "वयं धान्यागारं धान्येन पूरयिष्यामः । उत्तमकृषिं कृत्वा अधिकधान्यानि उत्पादयिष्यामः । ग्रामे आयुधानि सज्जीकरिष्यामः । युवकान् युद्धकलां बोधयिष्यामः । अद्यैव कार्यारम्भं करिष्यामः" इति । एतत् श्रुत्वा राणाप्रतापः अवदत् - "यदि वयं सर्वे सम्भूय कार्यं करिष्यामः तर्हि नष्टानि राज्यानि प्रतिप्राप्स्यामः एव । प्रमुखाः वयं यथा व्यवहरिष्यामः तथा जनाः व्यवहरिष्यन्ति । वयम् अनुकरणयोग्याः भविष्यामः चेत् समग्रः देशः प्रेरितः भविष्यति । वयं पूर्णसन्नाहं करिष्यामः । योग्ये काले युद्धम् उद्घोषयिष्यामः" इति । तदा जनाः उत्थाय 'जयतु राणाप्रतापः, जयतु मेवाडराज्यम्' इति जयघोषं कृतवन्तः ।

ध्यानेन पठन्तु -
करिष्यति करिष्यतः करिष्यन्ति
करिष्यसि करिष्यथः करिष्यथ
करिष्यामि करिष्यावः करिष्यामः
-